पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्।
धर्म्मायतनमेतानि द्वादशायतनानि तु ॥
रागादीनां गणोऽयं स्यात् समुदेति नृणां हृदि ।
आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः ॥
क्षणिकाः सर्व्वसंस्कारा इति या वासना स्थिरा ।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥
प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा ।
चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः॥
अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते ।
सौत्रान्तिकेन प्रत्यक्षग्राह्योऽर्थो न बहिर्मतः ॥
आकारसहिता बुद्धिर्योगाचारस्य सम्मता ।
केवलां संविदं स्वस्थां मन्यन्ते मध्यमाः पुनः ॥
रागादिज्ञानसन्तानवासनाच्छेदसम्भवा ।
चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता ॥
कृत्तिः कमण्डलुर्मौण्ड्यं चीरं पूर्व्वाह्णभोजनम् ।
सङ्घो रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिः ॥”
इति ॥

। सर्व्वदर्शनसंग्रहे बौद्धदर्शनम् ॥)
(बुद्धेरिदमिति व्युत्पत्त्या वाच्यलिङ्गः। बुद्धसम्बन्धि वस्तु ॥)

बौद्धः, पुं, (बुद्धं बुद्धशास्त्रं वेत्तीति । बुद्ध + अण् ।) बुद्धशास्त्रावलम्बी । तत्पर्य्यायः। भिक्षुकः २ क्षपणः ३ अह्नीकः ४ वैनायिकः ५ । इति त्रिकाण्डशेषः ॥

बौधः, पुं, (बुधस्यापत्यं पुमान् । बुध + अण् ।) बुधस्य पुत्त्रः। स च पुरूरवाः । इति हेमचन्द्रः । ३ । ३६५ ॥

व्यध, य कौ ताडे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-अनिट् ।) य विध्यति शत्रुं शूरः । कौ अव्यात्सीत् । कश्चित्तु द्विर्भूतस्यानिकारीभूतयकारस्य बधेर्बकारो वर्ग्यः अन्यत्र दन्त्यः इति मन्वानः सनि विव्यत्सतीत्याह । इति दुर्गादासः ॥

व्युष, क उत्सृजि । उत्सर्गे । (चुरा०-पर०-सक०-सेट् ।) क व्योषयति धनं दाता । व्योषं त्रिकटु । इति दुर्गादासकृतधातुदीपिकायां गोविन्दभट्टः ॥

ब्रण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ब्रणति । इति दुर्गादासः ॥

ब्रततिः, स्त्री, (ब्रजन्ती ततिर्विस्तृतिर्यस्याः । पृषोदरादित्वात् साधुः । यद्वा, प्रतनोतीति । तनु विस्तारे “क्तिच् क्तौ च संज्ञायाम् ।” ३ । ३ । १७४ । इति क्तिच् । पृषोदरादित्वात् पस्य वः ।) लता । विस्तारः । इत्यमरः ॥

ब्रध्नः, पुं, (बन्धबन्धने + “बन्धेर्ब्रधिबुधी च । उणा० ३ । ५ । इति नक् ब्रधादेशश्च ।) सूर्य्यः । (यथा, ऋग्वेदे । १ । ६ । १ ।
“युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः ।
रोचन्ते रोचना दिवि ॥”)
वृक्षमूलम् । अर्कवृक्षः । इत्यमरः ।२।४।१५। शिवः । इति हेमचन्द्रः ॥ मेदिनीकारेणान्तःस्थवकारादौ लिखितोऽयं शब्दः ॥ (दिनम् । अश्वः । इति निघण्टुः ॥ चतुर्द्दशमनोर्भौत्यस्य पुत्त्रभेदः । यथा, मार्कण्डेये । १०० । ३२ ।
“गुरुर्गभीरो ब्रध्नश्च भरतोऽनुग्रहस्तथा ।
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ॥”)
रोगविशेषः । तस्य लक्षणं यथा,
“अभ्यभिष्यन्दिगुर्व्वामसेवनाभिचयं गतः ।
करोति ग्रन्थिवच्छोथं दोषो वङ्क्षणसन्धिषु ॥
ज्वरशूलाङ्गसादाढ्यं तं ब्रध्नमिति निर्द्दिशेत् ॥”
इति माधवकरः ॥

तस्य चिकित्सा ।
“भृष्टश्चैरण्डतैलेन सम्यक् कल्कोऽभयाभवः ।
कृष्णासैन्धवसंयुक्तो ब्रध्नरोगहरः परः ॥
अजाजीहवुषाकुष्ठं गोमेदबदरान्वितम् ।
काञ्जिकेन तु संपिष्टं तल्लेपो ब्रध्नजित् परः ॥”
गोमेदं पत्रम् । तथा च निघण्टौ धन्वन्तरिः ।
“पत्रं दलाह्वयं रामं गोमेदं रसनाह्वयम् ॥”
इति भावप्रकाशः ॥
(अस्य सम्प्राप्तिलक्षणं यथा,—
“यस्य वायुः प्रकुपितः शोफशूलकरश्चरन् ।
वंक्षणाद्वृषणौ याति ब्रध्नस्तस्योपजायते ॥”
इति चरके सूत्रस्थानेऽष्टादशेऽध्याये ॥)

ब्रह्म, क्ली, (वृंहति वर्द्धते निरतिशयमहत्त्वलक्षणवृद्धिमान् भवतीत्यर्थः । वृहिवृद्धौ + “वृंहेर्नोऽच्च ।” उणा० ४ । १४५ । मनिन् नकारस्याकारः । रत्वञ्च ।) वेदः । (यथाह श्रुतिः ।
“तस्मादेतद्ब्रह्मनामरूपमन्नञ्च जायते ॥”
तथा च भागवते । १ । १ । १ ।
“जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः ॥”
वेदान्तमते ‘वस्तु सच्चिदानन्दाद्वयं ब्रह्म तथा अज्ञानादिसकलजड़समूहोऽवस्तु ।’ ‘ब्रह्मैव नित्यं वस्तु तदन्यदखिलमनित्यम् ।’ तथाहि,—
“यस्मादर्व्वाक् संवत्सरोऽहोभिः परिवर्त्तते ।”
तदेव ज्योतिषां ज्योतिः । नित्यं विभु सर्व्वगतं सुसूक्ष्मम् । आकाशवत् सर्व्वगतश्च नित्यः । अजो नित्यः शाश्वतः सत्यं ज्ञानमनन्तं ब्रह्म रातेर्दातुः परायणं यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति सभूमा यो वै भूमा तदमृतम् ।” इत्यादि श्रुतिभ्यो ब्रह्मणि नित्यत्वं विशुद्धसत्त्वस्य पुंसः प्रतिभाति । तथा, नैवेह किञ्चनाग्र आसीत् मृत्युनैवेदमावृतमासीत् । आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत् सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं नेति नेति नेह नानास्ति किञ्चन यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम् अथ यदल्पं तन्मर्त्त्यम् ।” इत्यादि श्रुतिवचनेभ्यो ब्रह्मणोऽन्यत्वं भेदप्रपञ्चेऽनित्यत्वञ्च तस्यैव पुंसः प्रतिभाति । तथानुमानमपि यथा, विमतोऽचेतनवर्गोऽनित्यो विभक्तत्वात् घटपटस्तम्भादिवत् इति । अनेन हि विभक्तस्यानित्यत्वेऽवगते तस्मिन्ननुगतप्रकाशात्मकस्य ब्रह्मणोऽविभक्तस्य नित्यत्वमपि अर्थादवगच्छति । इति वेदान्तसारे विद्वन्मनोरञ्जनीटीका ॥ तत्र श्रुतिवाक्यानि यथा, “सत्यं ज्ञानमनन्तं ब्रह्म । विज्ञानमानन्दं ब्रह्म ।” “आनन्दो ब्रह्मेति व्यजानात् आनन्दरूपममृतं यद् विभाति, यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तत् विजिज्ञासस्व तद्ब्रह्मेति ।” इत्याद्यसंख्येयं श्रुतिवचनमनुसन्धेयम् ॥”)
तत्त्वम् । तपः । इत्यमरः । ३ । ३ । ११४ ॥
ब्रह्म चतुर्व्विधं यथा । विराट् १ हिरण्यगर्भः २ ईश्वरः ३ तुरीयः ४ । इति वेदान्तसारः ॥
अस्य लक्षणम् । यथा, आत्मबोधे ।
“यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् ।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥
यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः ।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥
तिर्य्यगूर्द्ध्वमधःपूर्णं सच्चिदानन्दमद्वयम् ।
अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यते द्वयम् ।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत ॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् ।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम् ॥
सर्व्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्ष्यते ।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ॥”
अपि च । “सत्यमानन्दमद्वयममृतमेकरूपं वाङ्मनसोऽगोचरं सर्व्वगं सर्व्वातीतं चिदेकरसं देशकालापरिच्छिन्नमपादमपि शीघ्रगमपाणि च सर्व्वग्रहमचक्षुरपि सर्व्वद्रष्टृ अश्रोत्रमपि सर्व्वश्रोतृ अचिन्त्यमपि सर्व्वज्ञं सर्व्वनियन्तृ सर्व्वशक्ति सर्व्वेषां सृष्टिस्थितिलयकर्त्तृ किमपि वस्तु ब्रह्मेति वेदा वदन्ति ॥” शुद्धबुद्धस्वभाव इत्यौपनिषदाः । १ । आदिविद्वान् सिद्ध इति कापिलाः । २ । क्लेशकर्म्मविपाकाशयैरपरामृष्टो निर्म्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः । ३ । लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः । ४ । शिव इति शैवाः । ५ । पुरुषोत्तम इति वैष्णवाः । ६ । पितामह इति पौराणिकाः । ७ । यज्ञपुरुष इति याज्ञिकाः । ८ । सर्व्वज्ञ इति सौगताः । ९ । निरावरण इति दिगम्बराः । १० । उपास्यत्वेन देशित इति मीमांसकाः । ११ । लोकव्यवहारसिद्ध इति चार्व्वाकाः । १२ । यावदुक्तोपपन्न इति नैयायिकाः । १३ । विश्वकर्म्मेति शिल्पिनः । १४ । इति कुसुमाञ्जलिवृत्तिः ॥ योगशास्त्रमते ।
“ब्रह्मतेजोमयं शुक्रं यस्य सर्व्वमिदं रसः ।
एकस्य भूतं भूतस्य द्वयं स्थावरजङ्गमम् ॥
इति महाभारते मोक्षधर्म्मः ॥